Namaskara Shlokam (Loka Veeram)

Shlokas · Sanskrit

लोक वीरं महा पूज्यं सर्व रक्षाकरं विभुम्
पार्वती हृदया नन्दं शास्तारं प्रणमाम्यहम् |१

विप्र पूज्यं विश्व वंद्यं विष्णु शम्भो प्रियं सुतं
क्षिप्रप्रसाद निरतं शास्तारं प्राणमाम्यहम् ॥२

मत्तमातंग कमनं कारुण्यामृत पूरितं
सर्व विघ्न हरं देवं शास्तारं प्रणमाम्यहम् |३

अस्मत् कुलेश्वरं देवं अस्मत् शत्रु विनाशनं
अस्मदिष्ट प्रदतारं शास्तारं प्रणमाम्यहम् ॥४

पाण्ड्येश वंश तिलकं केरले केली विग्रहम्
आर्तत्राण परंतदेवं शास्तारं प्रणमाम्यहम् |५

पंचरत्नाक्यमेतद्यो नित्यं शुद्धः पठेन् नरः
तस्य प्रसन्नो भगवान् शास्ता वसदि मानसे । ६

शिववीर्यसमुद्भूतं श्रीनिवासतनूद्भवम् ।
शिखिवाहानुजं वन्दे शास्तारं प्रणमाम्यहम् ॥ ७॥

त्र्यम्बक पुराधीशं गणाधिप समन्वितम्
गजारूढं अहंवन्दे शास्तारं कुल दैवतम् ॥८

यस्य धन्वंतरीर माता पिता रुद्रो भिक्षकतमः
तं शास्तारं अहं वन्दे महा वैद्यं दयानिधिम् ।९

भूत नाथ सदानंदा सर्वभूत दया परा
रक्ष रक्ष महा बाहो शास्त्रे तुभ्यं नमो नमः |१०